# सङ्कलनात्मकं मूल्याङ्कनम्
# द्वितीयसत्रम्, 2014
## संस्कृतम् सम्प्रेषणात्मकम्
## कक्षा – दशमी

**समय : होरात्रयम्** **पूर्णाङ्काः90**

**निर्देशाः**

(i) प्रश्नपत्रे **चत्वारः खण्डाः** सन्ति।

खण्डः (क) अपठित–अवबोधनम् – 15 **अङ्काः**

खण्डः (ख) रचनात्मक-कार्यम् – 15 **अङ्काः**

खण्डः (ग) अनुप्रयुक्त–व्याकरणम् – 30 **अङ्काः**

खण्डः (घ) पठित–अवबोधनम् – 30 **अङ्काः**

(ii) सर्वे प्रश्नाः **अनिवार्याः**।

(iii) प्रश्नानाम् उत्तराणि खण्डानुसारं क्रमेणैव लेखनीयानि।

(iv) प्रश्नसंख्या अवश्यं लेखनीया।

(v) उत्तराणि संस्कृतेन एव लेखनीयानि।

**खण्डः 'क'**

**अपठित – अवबोधनम् ( 15 अङ्काः )**

1 **अधोलिखितम् अनुच्छेदं पठित्वा प्रश्नानाम् उत्तराणि लिखत।** 10

मालाकारस्य सुदासस्य सरोवरे एकं कमलं विकसितमासीत्। राजा तत्कमलमवश्यं क्रेष्यति, इति विचिन्त्य सः राजाप्रासादं प्रति अचलत्! मार्गे एकः धनिकः गच्छति स्म। सः तत् कमलं बुद्धदेवाय समर्पयितुम् इच्छति स्म अतः सः सुदासं तस्य मूल्यमपृच्छत्। सुदासोऽवदत् – एका स्वर्णमुद्रा। अथ यावत् सः मूल्यं दातुमुद्यतः अभवत् तावदेव नृपः स्वयं तदेव कमलम् दशरूप्यकैः क्रीत्वा बुद्धस्य चरणयोः अर्पयितुमिच्छति स्म। अथ सुदासः अवदत् – 'एतत् पुष्पं विक्रयाय नास्ति।' इति कथयित्वा सः स्वयं बहुधनलाभेच्छया तत् पुष्पं नीत्वा बुद्धस्य सकाशमगच्छत्। भगवान् बुद्धः वृक्षस्य छायायाम् उपविष्टः आसीत्। तस्यानने दिव्यानन्दः नेत्रयोः च अपारकरुणाऽऽसीत्। सुदासः तस्य चरणयोः तत् कमलमर्पयति। बुद्धदेवः स्मितहास्येन तमपृच्छत् – पुत्र! किं वाञ्छसि? प्रत्युत्तरेण सुदासोऽवदत् – प्रभो! केवलं तव

| | | | |
|---|---|---|---|
| | | चरणधूल्याः एकं कणं वाञ्छामि।<br><br>**प्रश्नाः**<br><br>**I. एकपदेन उत्तरत।**<br><br>(i) धनिकः कमलं कस्मै समर्पयितुम् इच्छति स्म?<br><br>(ii) भगवान् बुद्धः कस्य छायायाम् उपविष्टः आसीत्<br><br>**II. पूर्णवाक्येन उत्तरत।**<br><br>(i) धनिकं राजानम् च किमुक्त्वा सुदासः बुद्धस्य सकाशमगच्छत्?<br><br>(ii) सुदासः राजप्रासादं प्रति किमर्थमचलत्?<br><br>**III. निर्देशानुसारम् उत्तरत –**<br><br>(i) 'बुद्धः स्मितहास्येन तमपृच्छत्।'<br><br>अत्र 'तम्' इति सर्वनामपदं कस्मै प्रयुक्तम्<br><br>(अ) धनिकाय (ब) सुदासाय<br><br>(स) राज्ञे (द) कमलाय<br><br>(ii) 'क्रीत्वा' इति पदस्य विलोमपदं किम्?<br><br>(अ) कृत्वा (ब) विक्रीय<br><br>(स) क्रयं कृत्वा (द) कृष्ट्वा<br><br>**IV. अस्य अनुच्छेदस्य कृते समुचितं शीर्षकं लिखत।** | |
| | 2 | **अधोलिखितं श्लोकं पठित्वा प्रश्नानाम् उत्तराणि लिखत।**<br><br>सम्पत्सु महतां चित्तं भवत्युत्पलकोमलम्<br><br>आपत्सु च महाशैलशिलासंघातकर्कशम्।। | 5 |

**प्रश्नाः**

I. **एकपदेन उत्तरत।**

चित्तम् उत्पलकोमलं केषां भवति?

II. **पूर्णवाक्येन उत्तरत :**

(i) महतां चित्तम् उत्पलकोमलं कदा भवति?

(ii) आपत्सु महत्मनां चित्तं कीदृशं भवति?

III. **निर्देशानुसारम् उत्तरत –**

(i) 'कमलम्' इत्यस्य शब्दस्य पर्यायपदं विकल्पेभ्यः चित्वा लिखत –

(अ) उत्पलम् (ब) शतपत्री

(स) उटजम् (द) मल्लिका

(ii) श्लोके प्रयुक्तस्य 'कोमलम्' इति पदस्य विलोमपदं विकल्पेभ्यः चित्वा लिखत।

(अ) महतां (ब) महाशैलम्

(स) शिला (द) कर्कशम्

**खण्डः 'ख'**

**रचनात्मककार्यम् ( 15 अङ्काः )**

3 **मित्रस्य कुशलक्षेमं ज्ञातुं मित्रं प्रति लिखिते पत्रे रिक्तस्थानानि पूरयत।** 5

दिल्लीतः

तिथिः ________

प्रिय सखे रमेश!

| | | | |
|---|---|---|---|
| | | सादरं नमस्कारः। <br><br> __(i)__.भवदीयपत्रस्य प्रतीक्षां करोमि। पूर्वं भवन्तः प्रायेण प्रतिमासं पत्रं __(ii)__स्म। परं सम्प्रति षड् सप्त वा मासाः __(iii)__., भवतः एकम् अपि __(iv)__.न प्राप्तम्। अत्र किं कारणम् इति चिन्तया मम मनः नितरां (v)__.वर्तते। अतः सम्प्रति कृपया __(vi)__पत्रं संप्रेष्य मम __(vii)__.निवारणं कर्त्तव्यं, येन मम __(viii) .चिन्ता न स्यात्। __(ix)__. पत्रे न इतः अधिकं किञ्चित् लेखितुं कामये। अन्यत् सर्वं पत्रान्तरे __(x)__. । <br><br> मंगलाकांक्षी <br><br> क, ख, ग <br><br> **मञ्जूषा** -- मनसि, प्रेषयन्ति, अस्मिन्, यथाशीघ्रं, पत्रं, निवेदयिष्यामि, व्याकुलं, आशंकायाः, व्यतीताः, चिरकालात् | |
| 4 | | **अधःप्रदत्तम् चित्रम् आधृत्य मंजूषायां प्रदत्तशब्दानां सहायतया पंच संस्कृतवाक्यानि लिखत -** <br><br>  <br><br> **मंजूषा** <br><br> पटगृहम्, आसनानि, प्रीतिभोजनम्, पाचकाः, स्वादु, व्यंजनानि, विशाल-पत्राणि, पटले कटाहः, स्थाल्यः, दर्व्या चालयति, त्रयः बालकाः, आसन्दिकाः | 10 |

| | | | |
|---|---|---|---|
| | | | |
| | | **अथवा** | |
| | | ‘तरणतालम्’ इति विषयमधिकृत्य मञ्जूषायां प्रदत्तशब्दानां सहायतया पञ्च संस्कृतवाक्यानि लिखत।<br><br>**मञ्जूषा**<br><br>तरन्ति, आनन्देन, चिंतारहिता, जलक्रीडां, स्वास्थ्यवर्धकं, तरणं, प्रशिक्षिका:, प्रशिक्षणं, बालकबालिकाश्च, स्वच्छजले | 10 |
| | | **खण्डः ‘ग’**<br><br>**अनुप्रयुक्तवाक्यकरणम् ( 30 अङ्का: )** | |
| | 5 | **अधोलिखितेषु वाक्येषु रेखांकितपदेषु सन्धिच्छेदम् अथवा सन्धिं कृत्वा लिखत।**<br><br>(i) महाभारतस्य नै+अक: श्रीकृष्ण: अस्ति।<br><br>(ii) रेखा विद्यालयात् गृहम्+गच्छति।<br><br>(iii) राम: जगद्बन्धु: आसीत्।<br><br>(iv) कश्चित् नगरे स: तिष्ठति। | 4 |
| | 6 | **रेखाङ्कितपदानां समासं विग्रहं वा प्रदत्तविकल्पेभ्य: चित्वा लिखत।**<br><br>(i) कर्मपुरे प्रच्छन्नभाग्य: नामक कश्चित् कुमार: आसीत्।<br><br>(अ) प्रच्छन्नं भाग्यं येन स: (ब) प्रच्छन्ना भाग्या या सा<br><br>(स) प्रच्छन्न: भाग्य: य: स: (द) प्रच्छन्नं भाग्यं यस्य स: | 5 |

| | | | |
|---|---|---|---|
| | | (ii) दत्तम् धनम् यस्यै सः जनः आगतः।<br>(अ) दत्तधनम् (ब) दत्तधनः<br>(स) दत्तधनानि (द) दत्तधनाय<br>(iii) पिककाकयोः भेदं कथय।<br>(अ) पिका काकः च तयोः (ब) काकः पिकः च तस्मात्<br>(स) पिकः काकः च तेषां (द) पिकः च काकः च तयोः<br>(iv) राजा विनयेन सहितम् अवदत्।<br>(अ) सविनयेन (ब) सविनयः<br>(स) सविनयम् (द) सविनये<br>(v) यथाकालम् कार्यम् कुरु।<br>(अ) कालः यथा (ब) कालम् अनतिक्रम्य<br>(स) कालः अनतिक्रम्य (द) कालेन अनतिक्रम्य | |
| | 7 | **अधोलिखितवाक्येषु रेखाङ्कितपदानां 'प्रकृतिप्रत्ययौ' संयोज्य विभज्य वा समुचितम् उत्तरं प्रदत्तविकल्पेभ्यः चित्वा लिखत।**<br>(i) सर्वे जीवाः अत्र परस्परं भावयन्तः मोदन्ताम्।<br>(अ) भाव्+शानच् (ब) भाव्+तः<br>(स) भावय्+क्तवतु (द) भावय्+शतृ<br>(ii) तदेव महात्मानः तथ्यतः समत्वम् इति कथ्यते।<br>(अ) सम+त्व (ब) सम+त्वः<br>(स) सम+त्वम् (द) समत्+त्वं<br>(iii) विपुल+टाप् च अत्र वनसम्पदा।<br>(अ) विपुलेन (ब) विपुलः<br>(स) विपुला (द) विपुलता | 5 |

(iv) कंसस्य क्रूर+तल् महाभारते प्रसिद्धा।

(अ) क्रूरतां (ब) क्रूरता

(स) क्रूरत्व (द) क्रूरतया

(v) पचमाना माता बालकं पाठयति।

(अ) पच्+मान् (ब) पच्+शतृ

(स) पच्।शानच् (द) पच्।क्त

8 **अधोलिखित वाक्येषु रिक्त स्थानानि मञ्जूषायां प्रदत्त-अव्ययपदैः पूरयित्वा वाक्यानि पुनर्लिखत।** 5

(i) ________ मम अवकाशः आसीत्।

(ii) यत्र परिश्रमः ________ सफलता।

(iii) अहम् ________ विद्यालयं न गमिष्यामि।

(iv) ________ असत्यं न ब्रूयात्।

(v) त्वम् कार्यक्रमं द्रष्टुम् ________ गमिष्यसि?

**मञ्जूषा – तत्र, कदापि, कदा, श्वः, ह्यः**

9 **अधोलिखितवाक्येषु अङ्कानां संस्कृतसंख्यावाचकशब्दानां वा उचितपदैः रिक्तस्थानपूर्तिं कुरुत।** 5

(i) एकदा (एक) ________वृक्षे (त्रि) ________काकाः निवसन्ति स्म। तत्र (द्वि) ________ कोकिले अपि आगते। (पञ्चन्) ________ खगेषु परस्परं मैत्रीभावं आसीत्। तत्र (95) ______ खगाः समायान्ति स्म।

10 **अधोलिखितवाक्येषु रेखाङ्कितपदानां स्थाने प्रदत्तविकल्पेभ्यः शुद्धं पदं चित्वा लिखत।** 6

(i) मम स्यूते पुस्तकः अस्ति।

(अ) पुस्तके (ब) पुस्तकम्

(स) पुस्तकानि (द) पुस्तकाः

(ii) अद्य अवकाशः भविष्यति।

(अ) अस्ति (ब) स्तः

(स) आसन् (द) स्व

(iii) वृक्षेषु मर्कटाः आरोहति।

(अ) आरोहतः (ब) आरोहथ

(स) आरोहम् (द) आरोहन्ति

(iv) धनिकाः धनं ददाति।

(अ) धनिकेन (ब) धनिकैः

(स) धनिकः (द) धनिकम्

(v) रामश्यामौ पिबथः।

(अ) पिबन्ति (ब) पिबतः

(स) पिबति (द) पास्यति

(vi) त्वम् छात्रः अस्मि।

(अ) अस्ति (ब) असि

(स) सन्ति (द) स्मः

**खण्डः 'घ'**

**पठित-अवबोधनम् ( 30 अङ्काः )**

11 **अधोलिखितं गद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि लिखत।** 4

दुष्टबुद्धिः तु तस्य सद्वचनानि तिरस्कृत्य ग्रामाभिमुखम् प्राचलत्। प्रच्छन्नभाग्यः तु समुपजातविवेकः स्वगृहं प्रतिनिवृत्तः। गृहे तस्य भार्या सपदि समागतं पतिं दृष्ट्वा अपृच्छत् - आर्य किं सर्वगतं कुशलं वर्तते? अयथाकालं समागतोऽसि? सम्प्रति धर्ममतिः सः पश्चात्तापेन दग्धमानसः सर्वं वृत्तान्तं निवेद्य सकरुणम् उच्चैः अक्रन्दत्। बुद्धिमती सा अवदत्-अलं चिन्तया। आपदां तरणिः धैर्यम्। इदानीं विषादं त्यक्त्वा उद्यमः क्रियताम्।

I. **एकपदेन उत्तरत।**

कः सद्वचनानि तिरस्कृत्य ग्रामाभिमुखम् प्राचलत्?

II. **पूर्णवाक्येन उत्तरत।**

बुद्धिमती पत्नी पश्चात्तापेन दग्धं स्वपतिं किं कर्तुम् अकथयत्?

| | | | |
|---|---|---|---|
| | | III. **निर्देशानुसारम् उत्तरत–**<br><br>(i) ‘शीघ्रम्’ इति अर्थे किम् पदं अत्र प्रयुक्तम्?<br>(अ) समागतं (ब) सपदि<br>(स) सर्वगतं (द) सर्वं<br><br>(ii) ‘नीचैः’ अस्य किं विलोमपदम् अत्र प्रयुक्तम्?<br>(अ) निवेद्य (ब) आर्या<br>(स) उच्चैः (द) इदानीम् | |
| | 12 | **अधोलिखितं पद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि लिखत।**<br><br>य इच्छत्यात्मनः श्रेयः प्रभूतानि सुखानि च।<br>न कुर्यादहितं कर्म स परेभ्यः कदापि च।।<br><br>I. **एकपदेन उत्तरत।**<br>कीदृशं कर्म न कर्त्तव्यम्?<br><br>II. **पूर्णवाक्येन उत्तरत।**<br>नरः आत्मनः कृते कानि इच्छति?<br><br>III. **निर्देशानुसारम् उत्तरत –**<br><br>(i) ‘प्रभूतानि’ पदस्य विशेष्यपदं किम्?<br>(अ) श्रेयः (ब) सुखानि<br>(स) कर्म (द) आत्मनः<br><br>(ii) ‘इच्छति’ इति क्रियापदस्य किं कर्तृपदम्?<br>(अ) यः (ब) सः<br>(स) श्रेयः (द) कर्म | 4 |

| | | |
|---|---|---|
| 13 | **अधोलिखितं नाट्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि लिखत।** | 4 |

युधिष्ठिरः – सम्प्रति आश्वस्तः अस्मि। मन्ये सः ब्रह्मास्त्रप्रयोगं न करिष्यति।

श्रीकृष्णः – तर्हि न जानासि मनोवृत्तिम्। पितुः उपदेशेन असन्तुष्टः सः (अश्वत्थामा) एकदा द्वारकापुरीम् आगच्छत्। ब्रह्मास्त्रं दत्त्वा सः सुदर्शनचक्रम् अवाञ्छत्।

युधिष्ठिरः – (साश्चर्यम्) कथं चक्रम् इति।

श्रीकृष्णः – आम्। मया कथितम्। नाहं त्वत् (द्रौणेः) ब्रह्मास्त्रम् इच्छामि। यदि त्वं मम गदां शक्तिम् धनुः चक्रं वा इच्छसि तुभ्यं ददामि।

युधिष्ठिरः – ततस्ततः।

श्रीकृष्णः – स तु चक्रम् एव अयाचत्। गृहाण चक्रम् इति उक्तः सः सव्येन पाणिना चक्रं गृहीतवान्, किन्तु सः चक्रं स्वस्थानात् संचालयितुम् अपि समर्थः न अभवत्।

**I. एकपदेन उत्तरत।**

ब्रह्मास्त्रं दत्त्वा अश्वत्थामा श्रीकृष्णम् किम् अयाचत्?

**II. पूर्णवाक्येन उत्तरत।**

अश्वत्थामा कस्य चक्रं गृहीत्वा अपि चालयितुं शक्तः नाभवत्?

**III. निर्देशानुसारम् उत्तरत –**

(i) 'त्वत्' इति पदं कस्मै प्रयुक्तम्?

(अ) ब्रह्मास्त्राय (ब) युधिष्ठिराय

(स) कृष्णाय (द) द्रौणिने

(ii) 'असन्तुष्टः' इति विशेषणपदस्य विशेष्यपदं किम्?

(अ) पितुः (ब) उपदेशने

(स) सः (द) युधिष्ठिरः

| | | |
|---|---|---|
| 14 | **अधोलिखितस्य कथनद्वयस्य समुचितं भावं प्रदत्त-विकल्पेभ्यः चित्वा उत्तरपुस्तिकायां लिखत।** | 2 |

**( क )  जलबिन्दुनिपातेन क्रमशः पूर्यते घटः।**

(i) जलबिन्दुनिपातेन घटः अर्द्धः पूरयति तथैव धर्मस्य धनस्य घटः च।

(ii) सर्वकलाभिः धनस्य धर्मस्य घटः पूर्यते न तु जलबिन्दुभिः।

(iii) यथा एकैकबिन्दोः निपातेन घटः पूर्णः भवति तथैव विद्या धर्मः धनं च शनैः शनैः संग्रहेण एकत्रीक्रियन्ते।

(iv) जलबिन्दुभिः धर्मस्य धनस्य घटः पूर्यते।

**( ख )  क्रन्दनं वर्धते तस्य, नान्तं समधिगच्छति।**

(i) यः व्यसनं प्राप्य क्रन्दनं करोति तस्य दुःखस्य कदापि अन्तः न भवति।

(ii) यः व्यसनं प्राप्य मोहवशं केवलं परिदेवयेत् तस्य क्रन्दनं वर्धते अन्तं च न समधिगच्छति।

(iii) यः दुःखं प्राप्य क्रन्दनं करोति सः सदा सुखी भवति।

(iv) यः सुखं प्राप्य अपि क्रन्दनं करोति सः सदा दुःखी भवति।

15 **अधोलिखितश्लोकस्य अन्वयं मञ्जूषायाः उचितपदैः पूरयत।** 4

षण्णाभेर्द्वादशाक्षस्य चतुर्विंशतिपर्वणः।

यस्त्रिषष्टिशतारस्य वेदार्थं स परः कविः।।

**अन्वयः** – यः षण्णाभेः ___(i)___.चतुर्विंशतिः ___(ii)___. ___(iii)___.- अरस्य अर्थम् वेद स परः ___(iv)___.।

**मञ्जूषा**

पर्वणः, त्रिषष्टिशत, कविः, द्वादशाक्षस्य

16 **अधोलिखितवाक्येषु रेखाङ्कितपदानि आधृत्य प्रश्ननिर्माणं कुरुत।** 5

| | | | |
|---|---|---|---|
| | | (i) सङ्कल्पः वर्तमानकालदेशस्य परिचायकः।<br>(ii) कालः विश्वस्य आत्मा अस्ति।<br>(iii) सर्वः कामान् अवाप्नोतु।<br>(iv) कालस्य गणनायाः आधारः सूर्यः।<br>(v) सूर्यस्य द्वे गती। | |
| | 17 | **अधोलिखितवाक्यानि कथाक्रमानुसारम् लिखत।**<br>(i) प्रच्छन्नभाग्यः बाल्यकाले विद्यां न अधीतवान्।<br>(ii) एकस्मिन् नगरे प्रच्छन्नभाग्यः नाम कश्चित् कुमारः आसीत्।<br>(iii) दुष्टबुद्धेः संगत्या प्रच्छन्नभाग्यः चौरः अभवत्।<br>(iv) तौ मार्गे क्रीडतः बालकान् दृष्ट्वा अवदताम्–भो! किमर्थं विषमे मागे क्रीडथ?<br>(v) प्रच्छन्नभाग्यस्य नेत्रे समुन्मीलिते जाते।<br>(vi) एकः बालकः उवाच–भवन्तौ किमर्थं सुपथं त्यक्त्वा कुपथेन गन्तुं प्रवृत्तौ?<br>(vii) प्रच्छन्नभाग्यः दुष्टबुद्धिम् अवदत्–'सखे! साधुजनगर्हितम् इमं पन्थानं त्यजतु भवान्'।<br>(viii) एकदा स दुष्टबुद्धिना सह धनहरणार्थम् आगच्छत्। | 4 |
| | 18 | **रेखाङ्कितपदानां प्रसङ्गानुसारम् उचितम् अर्थम् चित्वा लिखत।**<br>(i) नरः परेभ्यः अहितं कर्म कदापि न कुर्यात्।<br>(अ) अशुभं (ब) हानिकारकं<br>(स) सुखकरं (द) अविचारितं<br>(ii) आचारः प्रथमः धर्मः।<br>(अ) सदाचरणम् (ब) व्यवहारः | 3 |

| | | | |
|---|---|---|---|
| | | (स) तपः (द) दानशीलता<br><br>(iii) लोके विद्वांस एव चक्षुष्मन्तः प्रकीर्तिताः।<br><br>(अ) कथिताः (ब) चिन्तिताः<br><br>(स) प्रशंसिताः (द) श्रेष्ठाः | |
| | | | |
| | | -o0o0o0o- | |